# Shri Mallari Sahasranama Stotram 1000 names

# શ્રીમલ્લારિસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Shri Mallari Sahasranama Stotram

File name : mallArisahasranAmastotram.itx

Category : sahasranAma, shiva

Location : doc_shiva

Transliterated by : NA

Proofread by : NA

Description-comments : malhArI sahastranAma

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# શ્રીમલ્લારિસહસ્રનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
શ્રીસરસ્વત્યૈ નમઃ ।
સ્થિતં કૈલાસનિલયે પ્રાણેશં લોકશઙ્કરમ્ ।
ઉવાચ શઙ્કરં ગૌરી જગદ્ધિતચિકીર્ષયા ॥ ૧॥

પાર્વત્યુવાચ ।
દેવદેવ મહાદેવ ભક્તાનન્દવિવર્ધન ।
પૃચ્છામિ ત્વામહં ચૈકં દુઃખદારિદ્ર્યનાશનમ્ ॥ ૨॥

કથયસ્વ પ્રસાદેન સર્વજ્ઞોઽસિ જગત્પ્રભો ।
સ્તોત્રં દાનં તપો વાપિ સદ્યઃ કામફલપ્રદમ્ ॥ ૩॥

ઈશ્વર ઉવાચ ।
માર્તણ્ડો ભૈરવો દેવો મલ્લારિરહમેવ હિ ।
તસ્ય નામસહસ્રં તે વદામિ શ ૃણુ ભક્તિતઃ ॥ ૪॥

સર્વલોકાર્તિશમનં સર્વસમ્પત્પ્રદાયકમ્ ।
પુત્રપૌત્રાદિ ફલદં અપવર્ગપ્રદં શિવમ્ ॥ ૫॥

ઈશ્વરોસ્ય ઋષિઃ પ્રોક્તઃ છન્દોઽનુષ્ટુપ્ પ્રકીર્તિતઃ ।
મલ્લારિર્મ્હાલસાયુક્તો દેવસ્ત્રત્ર સમીરિતઃ ॥ ૬॥

સર્વપાપક્ષયદ્વારા મલ્લારિપ્રીતયે તથા ।
સમસ્તપુરુષાર્થસ્ય સિદ્ધ્યે વિનિયોજિતઃ ॥ ૭॥

મલ્લારિર્મ્હાલસાનાથો મેઘનાથો મહીપતિઃ ।
મૈરાલઃ ખડ્ગરાજશ્ચેત્યમીભિર્નામમન્ત્રકૈઃ ॥ ૮॥

એતૈર્નમોન્તૈરોમાદ્યૈ કરયોશ્ચ હૃદાદિષુ ।
ન્યાસષટ્કં પુરા કૃત્વા નામાવલિં પઠેત ॥ ૯॥

અસ્ય શ્રીમલ્લારિસહસ્રનામસ્તોત્રમન્ત્રસ્ય ઈશ્વર ઋષિઃ ।
મ્હાલસાયુક્ત મલ્લારિર્દેવતા । અનુષ્ટુપ્છન્દઃ ।
સર્વપાપક્ષયદ્વારા શ્રીમલ્લારિપ્રીતયે
સકલપુરુષાર્થસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ૐ હ્રૂં હ્રાંમ્રિયમાણાનન્દમહાલક્ષ્મણેનમ ઇતિ ।
અથન્યાસઃ ।
મલ્લારયે નમઃ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
મ્હાલસાનાથાય નમઃ તર્જનીભ્યાં નમઃ ।
મેઘનાથાય નમઃ મધ્યમાભ્યાં નમઃ ।
મહીપતયે નમઃ અનામિકાભ્યાં નમઃ ।
મૈરાલાય નમઃ કનિષ્ઠિકાભ્યાં નમઃ ।
ખડ્ગરાજાય નમઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ૐ મલ્હારયે નમઃ હૃદયાય નમઃ ।
ૐ મ્હાલસાનાથાય નમઃ શિરસે સ્વાહા ।
ૐ મેઘનાથાય નમઃ શિખાયૈ વષટ્ ।
ૐ મહીપતયે નમઃ કવવાય હું ।
ૐ મૈરાલાય નમઃ નેત્રત્રયાય વૌષટ્ ।
ૐ ખડ્ગરાજાય નમઃ અસ્ત્રાય ફટ્ ।
અથ ધ્યાનમ્ ।
ધ્યાયેન્મલ્લારિદેવં કનકગિરીનિભં મ્હાલસાભૂષિતાઙ્કં
    શ્વેતાશ્વં ખડ્ગહસ્તં વિબુધબુધગણૈઃ સેવ્યમાનં કૃતાર્થૈઃ ।
યુક્તાઘ્રિં દૈત્યમૂર્ધ્નીડમરુવિલસિતં નૈશચૂર્ણાભિરામં
    નિત્યં ભક્તેષુતુષ્ટં શ્વગણપરિવૃતં વીરમોઙ્કારગમ્યમ્ ॥ ૧॥

મૂલમન્ત્રઃ ।
ૐ હ્રીં કૢં ત્કૢં સ્ત્રૄં હ્રૂં હ્રાં મ્રિયમાણાનન્દમહાલક્ષ્મણે નમઃ ।
ઇતિ અલોભઃ ઉચ્ચાર્ય ।
અથનામાવલીજપઃ ।
ૐ પ્રણવો બ્રહ્મ ઉદ્ગીથ ૐકારાર્થો મહેશ્વરઃ ।
મણિમલ્લમહાદૈત્યસંહર્તા ભુવનેશ્વરઃ ॥ ૧॥

દેવાધિદેવ ૐકારઃ સન્તપ્તામરતાપહા ।
ગણકોટિયુતઃ કાન્તો ભક્તચિંતામણિઃ પ્રભુ ॥ ૨॥

પ્રીતાત્મા પ્રથિતઃ પ્રાણ ઊર્જિતઃ સત્યસેવકઃ ।
માર્તણ્ડભૈરવો દેવો ગઙ્ગાહ્માલસિકાપ્રિયઃ ॥ ૩॥

ગુણગ્રામાન્વિતઃ શ્રીમાન્ જયવાન્ પ્રમથાગ્રણીઃ ।
દીનાનાથપ્રતીકાશઃ સ્વયમ્ભૂરજરામરઃ ॥ ૪॥

અખણ્ડિતપ્રીતમના મલ્લહા સત્યસઙ્ગરઃ ।
આનન્દરૂપપરમપરમાશ્ચર્યકૃદ્ગુરુઃ ॥ ૫॥

અજિતોવિશ્વસઞ્જેતા સમરાઙ્ગણદુર્જયઃ ।
ખણ્ડિતાખિલાવિઘ્નૌઘઃ પરમાર્થપ્રતાપવાન્ ॥ ૬॥

અમોઘવિદ્યઃ સર્વજ્ઞઃ શરણ્યઃ સર્વદૈવતમ્ ।
અનઙ્ગવિજયી જ્યાયાન્ જનત્રાતા ભયાપહા ॥ ૭॥

મહાહિવલયો ધાતા ચન્દ્રમાર્તણ્ડકુણ્ડલઃ ।
હરો ડમરુડાઙ્કારી ત્રિશૂલી ખડ્ગપાત્રવાન્ ॥ ૮॥

મણિયુદ્ધમહા હૃષ્ટોમુણ્ડમાલાવિરાજિતઃ ।
ખણ્ડેન્દુશેખરસ્ત્ર્યક્ષો મહામુકુટમણ્ડિતઃ ॥ ૯॥

વસન્તકેલિદુર્ધર્ષઃ શિખિપિચ્છશિખામણિઃ ।
ગઙ્ગામ્હાલસિકાઙ્કશ્ચ ગઙ્ગામ્હાલસિકાપતિઃ ॥ ૧૦॥

તુરઙ્ગમસમારૂઢો લિઙ્ગદ્વયકૃતાકૃતિઃ ।
ઋષિદેવગણાકીર્ણઃ પિશાચબલિપાલકઃ ॥ ૧૧॥

સૂર્યકોટિપ્રતીકાશશ્ચન્દ્રકોટિસમપ્રભઃ ।
અષ્ટસિદ્ધિસમાયુક્તઃ સુરશ્રેષ્ઠઃ સુખાર્ણવઃ ॥ ૧૨॥

મહાબલોદુરારાધ્યોદક્ષસિદ્ધિપ્રદાયકઃ ।
વરદોવીતરાગશ્ચકલિપ્રમથનઃ સ્વરાટ્ ॥ ૧૩॥

દુષ્ટહાદાનવારાતિરુત્કૃષ્ટફલદાયકઃ ।
ભવઃ કૃપાલુર્વિશ્વાત્માધર્મપુત્રર્ષિભીતિહા ॥ ૧૪॥

રુદ્રો વિવિજ્ઞઃ શ્રીકણ્ઠઃ પઞ્ચવક્ત્રઃ સુધૈકભૂઃ ।
પ્રજાપાલો વિશેષજ્ઞશ્ચતુર્વક્ત્રઃ પ્રજાપતિઃ ॥ ૧૫॥

ખડ્ગરાજઃ કૃપાસિન્ધુર્મલ્લસૈન્યવિનાશનઃ ।
અદ્વૈતઃ પાવનઃ પાતા પરાર્થૈકપ્રયોજનમ્ ॥ ૧૬॥

જ્ઞાનસાધ્યોમલ્લહરઃ પાર્શ્વસ્થમણિકાસુરઃ ।
અષ્ટધા ભજનપ્રીતો ભર્ગોમૃન્મયચેતનઃ ॥ ૧૭॥

મહીમયમહામૂર્તિર્મહીમલયસત્તનુઃ ।
ઉલ્લોલખડ્ગો મણિહા મણિદૈત્યકૃતસ્તુતિઃ ॥ ૧૮॥

સપ્તકોટિગણાધીશો મેઘનાથો મહીપતિઃ ।
મહીતનુઃ ખડ્ગરાજો મલ્લસ્તોત્રવરપ્રદઃ ॥ ૧૯॥

પ્રતાપી દુર્જયઃ સેવ્યઃ કલાવાન્વિશ્વરઞ્જકઃ ।
સ્વર્ણવર્ણોદ્ભુતાકારઃ કાર્તિકેયો મનોજવઃ ॥ ૨૦॥

દેવકૃત્યકરઃપૂર્ણોમણિસ્તોત્રવરપ્રદઃ ।
ઇન્દ્રઃ સુરાર્ચિતો રાજા શઙ્કરોભૂતનાયકઃ ॥ ૨૧॥

શીતઃ શાશ્વત ઈશાનઃ પવિત્રઃ પુણ્યપૂરુષઃ ।
અગ્નિપુષ્ટિપ્રદઃ પૂજ્યો દીપ્યમાનસુધાકરઃ ॥ ૨૨॥

ભાવી સુમઙ્ગલઃ શ્રેયાન્પુણ્યમૂર્તિર્યમો મનુઃ ।
જગત્ક્ષતિહરો હારશરણાગતભીતિહા ॥ ૨૩॥

મલ્લદ્વેષ્ટા મણિદેષ્ટા ખણ્ડરાડ્ મ્હાલસાપતિઃ ।
આધિહા વ્યાધિહા વ્યાલી વાયુઃ પ્રેમપુરપ્રિયઃ ॥ ૨૪॥

સદાતુષ્ટો નિધીશાગ્ર્યઃ સુધનશ્ચિન્તિતપ્રદઃ ।
ઈશાનઃ સુજયો જય્યોભજત્કામપ્રદઃ પરઃ ॥ ૨૫॥

અનર્ઘ્યઃ શમ્ભુરાર્તિઘ્નો મૈરાલઃ સુરપાલકઃ ।
ગઙ્ગાપ્રિયો જગત્રાતા ખડ્ગરાણ્ણયકોવિદઃ ॥ ૨૬॥

અગણ્યોવરદો વેધા જગન્નાથઃ સુરાગ્રણીઃ ।
ગઙ્ગાધરોઽદ્ભુતાકારઃ કામહા કામદોમૃતમ્ ॥ ૨૭॥

ત્રિનેત્રઃ કામદમનો મણિમલ્લદયાર્દ્રહૃત્ ।
મલ્લદુર્મતિનાશાઙ્ઘ્રિર્મલ્લાસુરકૃત સ્તુતિઃ ॥ ૨૮॥

ત્રિપુરારિર્ગણાધ્યક્ષો વિનીતોમુનિવર્ણિતઃ ।
ઉદ્વેગહા હરિર્ભીમો દેવરાજો બુધોઽપરઃ ॥ ૨૯॥

સુશીલઃ સત્ત્વસમ્પન્નઃ સુધીરોઽધિકભૂતિમાન્ ।

અન્ધકારિર્મહાદેવઃ સાધુપાલો યશસ્કરઃ ॥ ૩૦॥

સિંહાસનસ્થઃ સ્વાનન્દો ધર્મિષ્ઠો રુદ્ર આત્મભૂઃ ।
યોગીશ્વરો વિશ્વભર્તા નિયન્તા સચ્ચરિત્રકૃત્ ॥ ૩૧॥

અનન્તકોશઃ સદ્વેષઃ સુદેશઃ સર્વતો જયી ।
ભૂરિભાગ્યો જ્ઞાનદીપો મણિપ્રોતાસનો ધ્રુવઃ ॥ ૩૨॥

અખણ્ડિત શ્રીઃ પ્રીતાત્મા મહામહાત્મ્યભૂષિતઃ ।
નિરન્તરસુખીજેતા સ્વર્ગદઃ સ્વર્ગભૂષણઃ ॥ ૩૩॥

અક્ષયઃ સુગ્રહઃ કામઃ સર્વવિદ્યાવિશારદઃ ।
ભક્ત્યષ્ટકપ્રિયોજ્યાયાનનન્તોઽનન્તસૌખ્યદઃ ॥ ૩૪॥

અપારો રક્ષિતા નાદિર્નિત્યાત્માક્ષયવર્જિતઃ ।
મહાદોષહરો ગૌરો બ્રહ્માણ્ડપ્રતિપાદકઃ ॥ ૩૫॥

મ્હાલસેશો મહાકીર્તિઃ કર્મપાશહરો ભવઃ ।
નીલકણ્ઠો મૃડો દક્ષો મૃત્યુઞ્જય ઉદારધીઃ ॥ ૩૬॥

કપર્દી કાશિકાવાસઃ કૈલાસનિલયોઽમહાન્ ।
કૃત્તિવાસાઃ શૂલધરો ગિરિજેશો જટાધરઃ ॥ ૩૭॥

વીરભદ્રો જગદ્વન્દ્યઃ શરણાગતવત્સલઃ ।
આજાનુબાહુર્વિશ્વેશઃ સમસ્તભયભઞ્જકઃ ॥ ૩૮॥

સ્થાણુઃ કૃતાર્થઃ કલ્પેશઃ સ્તવનીયમહોદયઃ ।
સ્મૃતમાત્રાખિલાભિજ્ઞો વન્દનીયો મનોરમઃ ॥ ૩૯॥

અકાલમૃત્યુહરણો ભવપાપહરો મૃદુઃ ।
ત્રિનેત્રો મુનિહૃદ્વાસઃ પ્રણતાખિલદુઃખહા ॥ ૪૦॥

ઉદારચરિતો ધ્યેયઃ કાલપાશવિમોચકઃ ।
નગ્નઃ પિશાચવેષશ્ચ સર્વભૂતનિવાસકૃત્ ॥ ૪૧॥

મન્દરાદ્રિકૃતાવાસાઃ કલિપ્રમથનો વિરાટ્ ।
પિનાકી માનસોત્સાહી સુમુખો મખરક્ષિતઃ ॥ ૪૨॥ var સુખરક્ષિતઃ

દેવમુખ્યઃશમ્ભુરાદ્યઃ ખલહા ખ્યાતિમાન્ કવિઃ ।
કર્પૂરગૌરઃ કૃતધીઃ કાર્યકર્તા કૃતાધ્વરઃ ॥ ૪૩॥

તુષ્ટિપ્રદસ્તમોહન્તા નાદલુબ્ધઃ સ્વયં વિભુઃ ।  var પુષ્ટિપ્રદ
સિંહનાથો યોગનાથો મન્ત્રોદ્ધારો ગુહપ્રિયઃ ॥ ૪૪॥

ભ્રમહા ભગવાન્ભવ્યઃ શસ્ત્રધૃક્ ક્ષાલિતાશુભઃ ।
અશ્વારૂઢો વૃષસ્કન્ધો ધૃતિમાન્ વૃષભધ્વજઃ ॥ ૪૫॥

અવધૂતસદાચારઃ સદાતુષ્ટઃ સદામુનિઃ ।
વદાન્યો મ્હાલસાનાથઃ ખણ્ડેશઃ શમવાન્પતિઃ ॥ ૪૬॥

અલેખનીયઃ સંસારી સરસ્વત્યભિપૂજિતઃ ।
સર્વશાસ્ત્રાર્થનિપુણઃ સર્વમાયાન્વિતો રથી ॥ ૪૭॥

હરિચન્દનલિપ્તાઙ્ગઃ કસ્તૂરીશોભિતસ્તનુઃ ।
કુઙ્કુમાગરુલિપ્તાઙ્ગઃ સિન્દૂરાઙ્કિતસત્તનુઃ ॥ ૪૮॥

અમોઘવરદઃ શેષઃ શિવનામા જગદ્ધિતઃ ।
ભસ્માઙ્ગરાગઃ સુકૃતી સર્પરાજોત્તરીયવાન્ ॥ ૪૯॥

બીજાક્ષરંમન્ત્રરાજો મૃત્યુદૃષ્ટિનિવારણઃ ।
પ્રિયંવદો મહારાવો યુવા વૃઉદ્ધોઽતિબાલકઃ ॥ ૫૦॥

નરનાથો મહાપ્રાજ્ઞો જયવાન્સુરપુઙ્ગવઃ ।
ધનરાટ્ક્ષોભહૃદ્દક્ષઃ સુસૈન્યો હેમમાલકઃ ॥ ૫૧॥

આત્મારામો વૃષ્ટિકર્તા નરો નારાયણઃપ્રિયઃ ।
રણસ્થો જયસન્નાદો વ્યોમસ્થો મેઘવાન્પ્રભુઃ ॥ ૫૨॥

સુશ્રાવ્યશબ્દઃ સત્સેવ્યસ્તીર્થવાસી સુપુણ્યદઃ ।
ભૈરવો ગગનાકારઃ સારમેયસમાકુલઃ ॥ ૫૩॥

માયાર્ણવમહાધૈર્યો દશહસ્તોદ્ભુતઙ્કુરઃ ॥ ૫૪॥

ગુર્વર્થદઃ સતાં નાથો દશવક્ત્રવરપ્રદઃ ।
સત્ક્ષેત્રવાસઃ સદ્ધસ્ત્રોભૂરિદો ભયભઞ્જનઃ ॥ ૫૫॥

કલ્પનીહરિતો કલ્પઃ સજ્જીકૃતધનુર્ધરઃ ।
ક્ષીરાર્ણવમહાક્રીડઃ સદાસાગરસદ્ગતિઃ ॥ ૫૬॥

સદાલોકઃ સદાવાસઃ સદાપાતાલવાસકૃત્ ।
પ્રલયાગ્નિ જટોત્યુગ્રઃ શિવસ્ત્રિભુવનેશ્વરઃ ॥ ૫૭॥

ઉદયાચલસદ્દીપઃ પુણ્યશ્લોકશિખામણિઃ ।
મહોત્સવઃ સુગાન્ધર્વઃ સમાલોક્યઃ સુશાન્તધીઃ ॥ ૫૮॥

મેરુવાસઃ સુગન્ધાઢ્યઃ શીઘ્રલાભપ્રદોઽવ્યયઃ ।
અનિવાર્યઃ સુધૈર્યાર્થી સદાર્થિતફલપ્રદઃ ॥ ૫૯॥

ગુણસિન્ધુઃ સિંહનાદો મેઘગર્જિતશબ્દવાન્ ।
ભાણ્ડારસુન્દરતનુર્હરિદ્રાચૂર્ણ મણ્ડિતઃ ॥ ૬૦॥

ગદાધરકૃતપ્રૈષો રજનીચૂર્ણરઞ્જિતઃ ।
ધૃતમારી સમુત્થાનં કૃતપ્રેમપુરસ્થિતિઃ ॥ ૬૧॥

બહુરત્નાઙ્કિતો ભક્તઃ કોટિલાભપ્રદોઽનઘઃ ।
મલ્લસ્તોત્રપ્રહૃષ્ટાત્મા સદાદ્વીપપુરપ્રભુઃ ॥ ૬૨॥

મણિકાસુરવિદ્વેષ્ટા નાનાસ્થાનાવતારકૃત્ ।
મલ્લમસ્તકદત્તાંઘ્રિર્મલ્લનામાદિનામવાન્ ॥ ૬૩॥

સતુરઙ્ગમણિપ્રૌઢરૂપસન્નિધિભૂષિતઃ ।
ધર્મવાન્ હર્ષવાન્વાગ્મી ક્રોધવાન્મદરૂપવાન્ ॥ ૬૪॥

દમ્ભરૂપી વીર્યરૂપી ધર્મરૂપી સદાશિવઃ ।
અહઙ્કારી સત્ત્વરૂપી શૌર્યરૂપી રણોત્કટઃ ॥ ૬૫॥

આત્મરૂપી જ્ઞાનરૂપી સકલાગમકૃચ્છિવઃ ।
વિદ્યારૂપી શક્તિરૂપી કરુણામૂર્તિરાત્મધીઃ ॥ ૬૬॥

મલ્લજન્યપરિતોષો મણિદૈત્યપ્રિયઙ્કરઃ ।
મણિકાસુરમૂર્દ્ધાંઘ્રિર્મણિદૈત્યસ્તુતિપ્રિયઃ ॥ ૬૭॥

મલ્લસ્તુતિમહાહર્ષો મલ્લાખ્યાપૂર્વનામભાક્ ।
ધૃતમારી ભવક્રોધો મણિમલ્લહિતેરતઃ ॥ ૬૮॥

કપાલમાલિતોરસ્કો મણિદૈત્યવરપ્રદઃ ।
કપાલમાલી પ્રત્યક્ષો માણિદૈત્યશિરોઙ્ઘ્રિદઃ ॥ ૬૯॥

ધૃતમારી ભવકૃત્રેભો મણિદૈત્યહિતેરતઃ ।
મણિસ્તોત્રપ્રહૃષ્ટાત્મા મલ્લાસુરગતિપ્રદઃ ॥ ૭૦॥

મણિચૂલાદ્રિનિલયો મૈરાલપ્રકરસ્ત્રિગઃ ।
મલ્લદેહશિરઃ પાદતલ એકાદશાકૃતિઃ ॥ ૭૧॥

મણિમલ્લમહાગર્વહરસ્ત્ર્યક્ષર ઈશ્વરઃ ।
ગઙ્ગામ્હાલસિકાદેવો મલ્લદેહ શિરોન્તકઃ ॥ ૭૨॥

મણિમલ્લવધોદ્રિક્તો ધર્મપુત્રપ્રિયઙ્કરઃ ।
મણિકાસુરસંહર્તા વિષ્ણુદૈત્યનિયોજકઃ ॥ ૭૩॥

અક્ષરોમાતૃકારૂપઃ પિશાચગુણમણ્ડિતઃ ।
ચામુણ્ડાનવકોટીશઃ પ્રધાનં માતૃકાપતિઃ ॥ ૭૪॥

ત્રિમૂર્તિર્માતૃકાચાર્યઃ સાઙ્ખ્યયોગાષ્ટભૈરવઃ ।
મણિમલ્લસમુદ્ભૂતવિશ્વપીડાનિવારણઃ ॥ ૭૫॥

હુંફડ્વૌષડ્વષટ્કારો યોગિનીચક્રપાલકઃ ।
ત્રયીમૂર્તિઃ સુરારામસ્ત્રિગુણો માતૃકામયઃ ॥ ૭૬॥

ચિન્માત્રો નિર્ગુણો વિષ્ણુર્વૈષ્ણવાર્ચ્યો ગુણાન્વિતઃ ।
ખડ્ગોદ્યતતનુઃ સોહંહંસરૂપશ્ચતુર્મુખઃ ॥ ૭૭॥ આમ્નાયત્તતનુ

પદ્મોદ્ભવો માતૃકાર્થો યોગિનીચક્રપાલકઃ ।
જન્મમૃત્યુજરાહીનો યોગિનીચક્રનામકઃ ॥ ૭૮॥

આદિત્યાગમાચાર્યો યોગિનીચક્રવલ્લભઃ ।
સર્ગસ્થિત્યન્તકૃચ્છ્રીદએકાદશશરીરવાન્ ॥ ૭૯॥

આહારવાન્ હરિર્ધાતા શિવલિઙ્ગાર્ચનપ્રિયઃ ।
પ્રાંશુઃ પાશુપતાર્ચ્યાંઘ્રિર્હુતભુગ્યજ્ઞપૂરુષઃ ॥ ૮૦॥

બ્રહ્મણ્યદેવો ગીતજ્ઞો યોગમાયાપ્રવર્તકઃ ।
આપદુદ્ધારણો ઢુણ્ડી ગઙ્ગામૌલિ પુરાણકૃત્ ॥ ૮૧॥

વ્યાપી વિરોધહરણો ભારહારી નરોત્તમઃ ।
બ્રહ્માદિવર્ણિતો હાસઃ સુરસઙ્ઘમનોહરઃ ॥ ૮૨॥

વિશામ્પતિર્દિશાન્નાથો વાયુવેગો ગવામ્પતિઃ ।
અરૂપી પૃથિવીરૂપસ્તેજોરૂપોઽનિલો નરઃ ॥ ૮૩॥

આકાશરૂપી નાદજ્ઞો રાગજ્ઞઃ સર્વગઃ ખગઃ ।
અગાધો ધર્મશાસ્ત્રજ્ઞ એકરાટ્ નિર્મલોવિભુઃ ॥ ૮૪॥

ધૂતપાપો ગીર્ણવિષો જગદ્યોનિર્નિધાનવાન્ ।

જગત્પિતા જગદ્બન્ધુર્જગદ્ધાતા જનાશ્રયઃ ॥ ૮૫॥

અગાધો બોધવાન્બોદ્ધા કામધેનુર્હતાસુરઃ ।
અણુર્મહાન્કૃશસ્થૂલો વશી વિદ્વાન્ધૃતાધ્વરઃ ॥ ૮૬॥

અબોધબોધકૃદ્વિત્તદયાકૃજ્જીવસંજ્ઞિતઃ ।
આદિતેયો ભક્તિપરો ભક્તાધીનોઽદ્વયાદ્વયઃ ॥ ૮૭॥

ભક્તાપરાધશમનો દ્વયાદ્વયવિવર્જિતઃ ।
સસ્યં વિરાટઃ શરણં શરણ્યં ગણરાડ્ગણઃ ॥ ૮૮॥

મન્ત્રયન્ત્રપ્રભાવજ્ઞો મન્ત્રયન્ત્રસ્વરૂપવાન્ ।
ઇતિ દોષહરઃ શ્રેયાન્ ભક્તચિન્તામણિઃ શુભઃ ॥ ૮૯॥

ઉઝ્ઝિતામઙ્ગલો ધર્મ્યો મઙ્ગલાયતનં કવિઃ ।
અનર્થજ્ઞોર્થદઃ શ્રેષ્ઠઃ શ્રૌતધર્મપ્રવર્તકઃ ॥ ૯૦॥

મન્ત્રબીજં મન્ત્રરાજો બીજમન્ત્રશરીરવાન્ ।
શબ્દજાલવિવેકજ્ઞઃ શરસન્ધાનકૃત્કૃતી ॥ ૯૧॥

કાલકાલઃ ક્રિયાતીતસ્તર્કાતીતઃ સુતર્કકૃત્ ।
સમસ્તતત્ત્વવિત્તત્ત્વં કાલજ્ઞઃ કલિતાસુરઃ ॥ ૯૨॥

અધીરધૈર્યકૃત્કાલો વીણાનાદમનોરથઃ ।
હિરણ્યરેતા આદિત્યસ્તુરાષાદ્શારદાગુરુઃ ॥ ૯૩॥

પૂર્વઃ કાલકલાતીતઃ પ્રપઞ્ચકલનાપરઃ ।
પ્રપઞ્ચકલનાગ્રસ્ત સત્યસન્ધઃ શિવાપતિઃ ॥ ૯૪॥

મન્ત્રયન્ત્રાધિપોમન્ત્રો મન્ત્રી મન્ત્રાર્થવિગ્રહઃ ।
નારાયણો વિધિઃ શાસ્તા સર્વાલક્ષણનાશનઃ ॥ ૯૫॥

પ્રધાનં પ્રકૃતિઃ સૂક્ષ્મોલઘુર્વિકટવિગ્રહઃ ।
કઠિનઃ કરુણાનમ્રઃ કરુણામિતવિગ્રહઃ ॥ ૯૬॥

આકારવાન્નિરાકારઃ કારાબન્ધવિમોચનઃ ।
દીનનાથઃ સુરક્ષાકૃત્સુનિર્ણીતવિધિહ્નુરઃ ॥ ૯૭॥

મહાભાગ્યોદધિર્વૈદ્યઃ કરુણોપાત્તવિગ્રહઃ ।
નગવાસી ગણાધારો ભક્તસામ્રાજ્યદાયકઃ ॥ ૯૮॥

સાર્વભૌમો નિરાધારઃ સદસદ્વ્યક્તિકારણમ્ ।
વેદવિદ્વેદકૃદ્વૈદ્યઃ સવિતા ચતુરાનનઃ ॥ ૯૯॥

હિરણ્યગર્ભસ્ત્રિતનુર્વિશ્વસાક્ષીવિભાવસુઃ ।
સકલોપનિષદ્રમ્યઃ સકલોપનિષદ્ગતિઃ ॥ ૧૦૦॥

વિશ્વપાદ્વિશ્વતશ્ચક્ષુર્વિશ્વતો બાહુરચ્યુતઃ ।
વિશ્વતોમુખ આધારસ્ત્રિપાદ્દિક્પતિરવ્યયઃ ॥ ૧૦૧॥

વ્યાસો વ્યાસગુરુઃ સિદ્ધિઃ સિદ્ધિદ સિદ્ધિનાયકઃ ।
જગદાત્મા જગત્પ્રાણો જગન્મિત્રો જગત્પ્રિયઃ ॥ ૧૦૨॥

દેવભૂર્વેદભૂર્વિશ્વં સર્ગસ્થિત્યન્તખેલકૃત્ ।
સિદ્ધચારણગન્ધર્વયક્ષવિદ્યાધરાર્ચિતઃ ॥ ૧૦૩॥

નીલકણ્ઠો હલધરો ગદાપાણિર્નિરઙ્કુશઃ ।
સહસ્રાક્ષો નગોદ્ધારઃ સુરાનીક જયાવહઃ ॥ ૧૦૪॥

ચતુર્વર્ગઃ કૃષ્ણવર્ત્મા કાલનૂપુરતોડરઃ ।
ઊર્ધ્વરેતા વાક્પતીશો નારદાદિમુનિસ્તુતઃ ॥ ૧૦૫॥

ચિદાનન્દચતુર્યજ્ઞસ્તપસ્વી કરુણાર્ણવઃ । ચિદાનન્દત્તનુ
પઞ્ચાગ્નિર્યાગસંસ્થાકૃદનન્તગુણનામભૃત્ ॥ ૧૦૬॥

ત્રિવર્ગસૂદિતારાતિઃ સુરરત્નન્ત્રયીતનુઃ ।
યાયજૂકશ્ચિરઞ્જીવી નરરત્નં સહસ્રપાત્ ॥ ૧૦૭॥

ભાલચન્દ્રશ્ચિતાવાસઃ સૂર્યમણ્ડલમધ્યગઃ । ચિરાવાસઃ
અનન્તશીર્ષા ત્રેતાગ્નિઃપ્રસન્નેષુનિષેવિતઃ ॥ ૧૦૮॥

સચ્ચિત્તપદ્મમાર્તણ્ડો નિરાતઙ્કઃ પરાયણઃ ।
પુરાભવો નિર્વિકારઃ પૂર્ણાર્થઃ પુણ્યભૈરવઃ ॥ ૧૦૯॥

નિરાશ્રયઃ શમીગર્ભો નરનારાયણાત્મકઃ ।
વેદાધ્યયનસન્તુષ્ટશ્ચિતારામો નરોત્તમઃ ॥ ૧૧૦॥

અપારધિષણઃ સેવ્યસ્ત્રિવૃત્તિર્ગુણસાગરઃ ।
નિર્વિકારઃ ક્રિયાધારઃ સુરમિત્રં સુરેષ્ટકૃત્ ॥ ૧૧૧॥

આખુવાહશ્ચિદાનન્દઃ સકલપ્રપિતામહઃ ।
મનોભીષ્ટસ્તપોનિષ્ઠો મણિમલ્લવિમર્દનઃ ॥ ૧૧૨॥

ઉદયાચલ અશ્વત્થો અવગ્રહનિવારણઃ ।
શ્રોતા વક્તા શિષ્ટપાલઃ સ્વસ્તિદઃ સલિલાધિપઃ ॥ ૧૧૩॥

વર્ણાશ્રમવિશેષજ્ઞઃ પર્જન્ય સકલાર્તિભિત્ । સકલાર્તિજિત્
વિશ્વેશ્વરસ્તપોયુક્તઃ કલિદોષવિમોચનઃ ॥ ૧૧૪॥

વર્ણવાન્વર્ણરહિતો વામાચારનિષેધકૃત્ ।
સર્વવેદાન્તતાત્પર્યસ્તપઃસિદ્ધિપ્રદાયકઃ ॥ ૧૧૫॥

વિશ્વસંહારરસિકો જપયજ્ઞાદિલોકદઃ ।
નાહંવાદી સુરાધ્યક્ષો નૈષચૂર્ણઃ સુશોભિતઃ ॥ ૧૧૬॥

અહોરાજસ્તમોનાશોવિધિવક્ત્રહરોન્નદઃ ।
જનસ્તપો મહઃ સત્યંભૂર્ભુવઃસ્વઃસ્વરૂપવાન્ ॥ ૧૧૭॥

મૈનાકત્રાણકરણઃ સુમૂર્ધા ભૃકુટીચરઃ ।
વૈખાનસપતિર્વૈશ્યશ્ચક્ષુરાદિપ્રયોજકઃ ॥ ૧૧૮॥

દત્તાત્રેયઃ સમાધિસ્થોનવનાગસ્વરૂપવાન્ ।
જન્મમૃત્યુજરાહીનો દૈત્યભેત્તેતિહાસવિત્ ॥ ૧૧૯॥

વર્ણાતીતો વર્તમાનઃ પ્રજ્ઞાદસ્તાપિતાસુરઃ ।
ચણ્ડહાસઃ કરાલાસ્યઃ કલ્પાતીતશ્ચિતાધિપઃ ॥ ૧૨૦॥

સર્ગકૃત્સ્થિતિકૃદ્ધર્તા અક્ષરસ્ત્રિગુણપ્રિયઃ ।
દ્વાદશાત્મા ગુણાતીતસ્ત્રિગુણસ્ત્રિજગત્પતિઃ ॥ ૧૨૧॥

જ્વલનો વરુણો વિન્ધ્યઃ શમનો નિરૃતિઃ પૃથુઃ ।
કૃશાનુરેતા દૈત્યારિસ્તીર્થરૂપો કુલાચલઃ ॥ ૧૨૨॥

દેશકાલાપરિચ્છેદ્યો વિશ્વગ્રાસવિલાસકૃત્ ।
જઠરો વિશ્વસંહર્તા વિશ્વાદિગણનાયકઃ ॥ ૧૨૩॥

શ્રુતિજ્ઞો બ્રહ્મજિજ્ઞાસુરાહારપરિણામકૃત્ ।
આત્મજ્ઞાનપરઃ સ્વાન્તોઽવ્યક્તોઽવ્યક્તવિભાગવાન્ ॥ ૧૨૪॥

સમાધિગુરુરવ્યક્તોભક્તાજ્ઞાનનિવારણઃ ।
કૃતવર્ણસમાચારઃ પરિવ્રાડધિપો ગૃહી ॥ ૧૨૫॥

મહાકાલઃ ખગપતિવર્ણાવર્ણવિભાગકૃત્ ।

કૃતાન્તઃ કીલિતેન્દ્રારિઃ ક્ષણકાષ્ઠાદિરૂપવાન્ ॥ ૧૨૬॥

વિશ્વજિત્તત્ત્વજિજ્ઞાસુર્બ્રાહ્મણો બ્રહ્મચર્યવાન્ ।
સર્વવર્ણાશ્રમપરો વર્ણાશ્રમબહિસ્થિતિઃ ॥ ૧૨૭॥

દૈત્યારિર્બ્રહ્મજિજ્ઞાસુર્વર્ણાશ્રમનિષેવિતઃ ।
બ્રહ્માણ્ડોદરભૃત્ક્ષેત્રં સ્વરવર્ણસ્વરૂપકઃ ॥ ૧૨૮॥

વેદાન્તવચનાતીતો વર્ણાશ્રમપરાયણઃ ।
દૃગ્દૃશ્યોભયરૂપૈકોમેનાપતિસમર્ચિતઃ ॥ ૧૨૯॥

સત્ત્વસ્થઃ સકલદ્રષ્ટા કૃતવર્ણાશ્રમસ્થિતઃ ।
વર્ણાશ્રમપરિત્રાતા સખા શૂદ્રાદિવર્ણવાન્ ॥ ૧૩૦॥

વસુધોદ્ધારકરણઃ કાલોપાધિઃ સદાગતિઃ ।
દૈતેયસૂદનોતીતસ્મૃતિજ્ઞો વડવાનલઃ ॥ ૧૩૧॥

સમુદ્રમથનાચાર્યો વનસ્થોયજ્ઞદૈવતમ્ ।
દૃષ્ટાદૃષ્ટક્રિયાતીતો હેમાદ્રિર્હરિચન્દનઃ ॥ ૧૩૨॥

નિષિદ્ધનાસ્તિકમતિર્યજ્ઞભુક્પારિજાતકઃ ।
સહસ્રભુજહાશાન્તઃ પાપારિક્ષીરસાગરઃ ॥ ૧૩૩॥

રાજાધિરાજસન્તાનઃ કલ્પવૃક્ષસ્તનૂનપાત્ ।
ધન્વન્તરિર્વેદવક્તા ચિતાભસ્માઙ્ગરાગવાન્ ॥ ૧૩૪॥

કાશીશ્વરઃ શ્રોણિભદ્રો બાણાસુરવરપ્રદઃ ।
રજસ્થઃ ખણ્ઢિતાધર્મ આભિચારનિવારણઃ ॥ ૧૩૫॥

મન્દરો યાગફલદસ્તમસ્થો દમવાન્શમી ।
વર્ણાશ્રમાઃ નન્દપરો દૃષ્ટાદૃષ્ટફલપ્રદઃ ॥ ૧૩૬॥

કપિલસ્ત્રિગુણાનન્દઃ સહસ્રફણસેવિતઃ ।
કુબેરો હિમવાઞ્છત્રં ત્રયીધર્મપ્રવર્તકઃ ।
આદિતેયો યજ્ઞફલં શક્તિત્રયપરાયણઃ ।
દુર્વાસાઃ પિતૃલોકેશોવીરસિંહપુરાણવિત્ ॥ ૧૩૮॥

અગ્નિમીળેસ્ફુરન્મૂર્તિઃ સાન્તર્જ્યોતિઃ સ્વરૂપકઃ ।
સકલોપનિષત્કર્તા ખાંબરો ઋણમોચકઃ ॥ ૧૩૯॥

તત્ત્વજ્યોતિઃ સહસ્રાંશુરિષેત્વોર્જલસત્તનુઃ ।

યોગજ્ઞાનમહારાજઃ સર્વવેદાન્તકારણમ્ ॥ ૧૪૦॥

યોગજ્ઞાનસદાનન્દઃ અગ્નાયાહિરૂપવાન્ ।
જ્યોતિરિન્દ્રિયસંવેદ્યઃ સ્વાધિષ્ઠાનવિજૃમ્ભકઃ ॥ ૧૪૧॥

અખણ્ડબ્રહ્મખણ્ડશ્રીઃ શન્નોદેવીસ્વરૂપવાન્ ।
યોગજ્ઞાનમહાબોધો રહસ્યં ક્ષેત્રગોપકઃ ॥ ૧૪૨॥

ભ્રૂમધ્યવેક્ષ્યો ગરલી યોગજ્ઞાન સદાશિવઃ ।
ચણ્ડાચણ્ડબૃહદ્ભાનુર્નયનસ્ત્વરિતાપતિઃ ॥ ૧૪૩॥

જ્ઞાનમહાયોગી તત્ત્વજ્યોતિઃ સુધારકઃ ।
ફણિબદ્ધજટાજૂટો બિન્દુનાદકલાત્મકઃ ॥ ૧૪૪॥

યોગજ્ઞાનમહાસેનો લમ્બિકોર્મ્યભિષિઞ્ચિતઃ ।
અન્તર્જ્યોતિર્મૂલદેવોઽનાહતઃ સુષુમાશ્રયઃ ॥ ૧૪૫॥

ભૂતાન્તવિદ્બ્રહ્મભૂતિર્યોગજ્ઞાનમહેશ્વરઃ ।
શુક્લજ્યોતિઃ સ્વરૂપઃ શ્રીયોગજ્ઞાનમહાર્ણવઃ ॥ ૧૪૬॥

પૂર્ણવિજ્ઞાનભરિતઃ સત્ત્વવિદ્યાવબોધકઃ ।
યોગજ્ઞાનમહાદેવશ્ચન્દ્રિકાદ્રવસુદ્રવઃ ॥ ૧૪૭॥

સ્વભાવયન્ત્રસઞ્ચારઃ સહસ્રદલમધ્યગઃ ॥ ૧૪૮॥

ઈશ્વર ઉવાચ ।
સહસ્રનામમલ્લારેરિદં દિવ્યં પ્રકાશિતમ્ ।
લોકાનાં કૃપયા દેવિપ્રીત્યા તવ વરાનને ॥ ૧૪૯॥

ય ઇદં પઠતે નિત્યં પાઠયેચ્છૃણુયાદપિ ।
ભક્તિતો વા પ્રસઙ્ગાદ્વા સકલં ભદ્રમશ્નુતે ॥ ૧૫૦॥

પુસ્તકં લિખિતં ગેહે પૂજિતં યત્ર તિષ્ઠતિ ।
તત્ર સર્વસમૃદ્ધીનામધિષ્ઠાનં ન સંશયઃ ॥ ૧૫૧॥

સુતાર્થી ધનદારાર્થીવિદ્યાર્થી વ્યાધિનાશકૃત્ ।
યશોર્થી વિજયાર્થીચ ત્રિવારં પ્રત્યહં પઠેત્ ॥ ૧૫૨॥

મહાપાપોપપાપાનાં પ્રાયશ્ચિત્તાર્થમાદરાત્ ।
પ્રાતસ્નાયી પઠેદેતત્ ષણ્માસાત્ સિદ્ધિમાપ્નુયાત્ ॥ ૧૫૩॥

રહસ્યાનાં ચ પાપાનાં પઠનાદેવ નાશનમ્ ।
સર્વારિષ્ટપ્રશમનં દુઃસ્વપ્નફલશાન્તિદમ્ ॥ ૧૫૪॥

સૂતિકાબાલસૌખ્યાર્થી સૂતિકાયતને પઠેત્ ।
સુસૂતિં લભતે નિત્યં ગર્ભિણી શ‍ૃણુયાદપિ ॥ ૧૫૫॥

યાચનારીપતદ્ગર્ભાદૃઢગર્ભાભવેત્ધ્રુવમ્ ।
સુતાસુતપરીવારમણ્ડિતા મોદતે ચિરમ્ ॥ ૧૫૬॥

આયુષ્યસન્તતિં નૂનં યાભવેન્મૃતવત્સકા ।
વન્ધ્યાપિ લભતે ભીષ્ટસન્તતિં નાત્ર સંશયઃ ॥ ૧૫૭॥

ભર્તુઃ પ્રિયત્વમાપ્નોતિ સૌભાગ્યં ચ સુરૂપતામ્ ।
નસપત્નીમપિલભેદ્વૈધવ્યં નાપ્નુયાત્ક્વચિત્ ॥ ૧૫૮॥

લભેત્પ્રીતિમુદાસીના પતિશુશ્રૂષણેરતા ।
સર્વાધિકં વરં કન્યાવિરહં ન કદાચન ॥ ૧૫૯॥

જાતિસ્મરત્વમાપ્નોતિ પઠનાચ્છ્રવણાદપિ ।
સ્ખલદ્ધીઃ સરલાંવાણીં કવિત્વં કવિતાપ્રિયઃ ॥ ૧૬૦॥

પ્રજ્ઞાતિશયમાપ્નોતિ પઠતાં ગ્રન્થધારણે ।
નિર્વિઘ્નં સિદ્ધિમાપ્નોતિ યઃ પઠેદ્બ્રહ્મચર્યવાન્ ॥ ૧૬૧॥

સર્વરક્ષાકરં શ્રેષ્ઠં દુષ્ટગ્રહનિવારણમ્ ।
સર્વોત્પાતપ્રશમનં બાલગ્રહવિનાશનમ્ ॥ ૧૬૨॥

કુષ્ઠાપસ્મારરોગાદિહરણં પુણ્યવર્ધનમ્ ।
આયુર્વૃદ્ધિકરં ચૈવ પુષ્ટિદં તોષવર્ધનમ્ ॥ ૧૬૩॥

વિષમે પથિ ચોરાદિસઙ્ઘાતે કલહાગમે ।
રિપૂણાં સન્નિધાને ચ સંયમે ન પઠેદિદમ્ ॥ ૧૬૪॥

મનઃ ક્ષોભવિષાદે ચ હર્ષોત્કર્ષે તથૈવચ ।
ઇષ્ટારમ્ભસમાપ્તૌ ચ પઠિતવ્ય પ્રયત્નતઃ ॥ ૧૬૫॥

સમુદ્રતરણે પોતલઙ્ઘને ગિરિરોહણે ।
કર્ષણે ગજસિંહાદ્યૈઃ સાવધાને પઠેદિદમ્ ॥ ૧૬૬॥

અવર્ષણે મહોત્પાતે દુરત્યયભવેત્તથા ।
શતવારં પઠેદેતત્સર્વદુષ્ટોપશાન્તયે ॥ ૧૬૭॥

શનિવારેર્કવારે ચ ષષ્ઠ્યાં ચ નિયતઃ પઠેત્ ।
મલ્લારિં પૂજયેદ્વિપ્રાન્ભોજયેદ્ભક્તિપૂર્વકમ્ ॥ ૧૬૮॥

ઉપવાસોથવા નક્તમેકભક્તમયાચિતમ્ ।
યથાશક્તિ પ્રકુર્વીત જપેત્સમ્પૂજયેદ્ધુનેત્ ॥ ૧૬૯॥

અગ્રવૃદ્ધ્યા પઠેદેતદ્ધોમપૂજા તથૈવ ચ ।
ભોજયેદગ્રવૃદ્ધાનાંબ્રાહ્મણાશ્ચ સુવાસિનીઃ ॥ ૧૭૦॥

નાનાજાતિભવાન્ભક્તાન્ભોજયેદનિવારિતમ્ ।
નાનાપરિમલૈર્દ્રવ્યૈઃ પલ્લવૈઃ કુસુમૈરપિ ॥ ૧૭૧॥

દમનોશીરપાક્યાદિતત્તત્કાલોદ્ભવૈઃ શુભૈઃ ।
નૈશભાણ્ડારચૂર્ણેન નાનારઞ્જિતતન્દુલૈઃ ॥ ૧૭૨॥

પૂજયેન્મ્હાલસાયુક્તં મલ્લારિં દેવભૂષિતમ્ ।
મલ્લારિપૂજનં હોમઃ સ્વભૂષાભક્તપૂજનમ્ ॥ ૧૭૩॥

પ્રીતિદાનોપયાગ્ચાદિ નૈશચૂર્ણેન સિદ્ધિદમ્ ।
યથાશ્રમં યથાકાલં યથાકુલચિકીર્ષિતમ્ ॥ ૧૭૪॥

નૈવેદ્યં પૂજનં હોમં કુર્યાત્સર્વાર્થસિદ્ધયે ।
શુભં ભાજનમાદાય ભક્ત્યા ભોમણ્ડિતઃ સ્વયમ્ ॥ ૧૭૫॥

યથાવર્ણકુલાચારં પ્રસાદં યાચયેન્મુહુઃ ।
મલ્લારિક્ષેત્રમુદ્દિશ્ય યાત્રાં ક્વાપિ પ્રકલ્પયેત્ ॥ ૧૭૬॥

વિત્તવ્યયશ્રમો નાત્ર મૈરાલસ્તેન સિદ્ધિદઃ ।
માર્ગશીર્ષે વિશેષેણ પ્રતિપત્ષષ્ઠિકાન્તરે ॥ ૧૭૭॥

પૂજાદ્યનુષ્ઠિતં શક્ત્યા તદક્ષયમસંશયમ્ ।
યદ્યત્પૂજાદિકં ભક્ત્યા સર્વકાલમનુષ્ઠિતમ્ ॥ ૧૭૮॥

અનન્તફલદં તત્સ્યાન્માર્ગશીર્ષે સકૃત્કૃતમ્ ।
ધનધાન્યાદિધેન્વાદિ દાસદાસીગૃહાદિકમ્ ॥ ૧૭૯॥

મલ્લારિપ્રીતયે દેયં વિશેષાન્માર્ગશીર્ષકે ।
ચમ્પાષષ્ઠ્યાં સ્કન્દષષ્ઠ્યાં તથા સર્વેષુ પર્વસુ ॥ ૧૮૦॥

ચૈત્રશ્રાવણપૌષેષુ પ્રીતો મલ્લારિરર્ચિતઃ ।

યદ્યત્પ્રિયતમં યસ્ય લોકસ્ય સુખકારણમ્ ॥ ૧૮૧॥

વિત્તશાઠ્યં પરિત્યજ્ય મલ્લારિપ્રીતયે પઠેત્ ।
પ્રસઙ્ગાદ્વાપિ બાલ્યાદ્વા કાપટ્યાદ્દમ્ભતોઽપિ વા ॥ ૧૮૨॥

યઃ પઠેચ્છૃણુયાદ્વાપિ સર્વાન્કામાનવાપ્નુયાત્ ।
અતિવશ્યો ભવેદ્રાજા લભતે કામિનીગણમ્ ॥ ૧૮૩॥

યદસાધ્યં ભવેલ્લોકે તત્સર્વં વશમાનયેત્ ।
શસ્ત્રાણ્યુત્પલસારાણિ ભવેદ્વહ્નિ સુશીતલઃ ॥ ૧૮૪॥

મિત્રવદ્વૈરિવર્ગઃ સ્યાદ્વિષં સ્યાત્પુષ્ટિવર્ધનમ્ ।
અન્ધોપિલભતે દૃષ્ટિં બધિરોઽપિ શ્રુતી લભેત્ ॥ ૧૮૫॥

મૂકોઽપિ સરલાં વાણીં પઠન્વાપાઠયન્નપિ ।
ધર્મમર્થં ચ કામં ચ બહુધા કલ્પિતં મુદા ॥ ૧૮૬॥

પઠન્શ‌ૃણ્વન્નવાપ્નોતિ પાઠં યો મતિમાનવઃ ।
ઐહિકં સકલં ભુક્ત્વા શેષે સ્વર્ગમવાપ્નુયાત્ ॥ ૧૮૭॥

મુમુક્ષુર્લભતે મોક્ષં પઠન્નિદમનુત્તમમ્ ।
સર્વકર્તુઃ ફલં તસ્ય સર્વતીર્થફલં તથા ॥ ૧૮૮॥

સર્વદાનફલં તસ્ય મલ્લારિર્યેન પૂજિતઃ ।
મલ્લારિરિતિ નામૈકં પુરુષાર્થપ્રદં ધ્રુવમ્ ॥ ૧૮૯॥

સહસ્રનામવિદ્યાયાઃ કઃ ફલં વેત્તિતત્ત્વતઃ ।
વેદાસ્યાધ્યયને પુણ્યં યોગાભ્યાસેઽપિ યત્ફલમ્ ॥ ૧૯૦॥

સકલં સમવાપ્નોતિ મલ્લારિભજનાત્પ્રિયે ।
તવ પ્રીત્યૈ મયાખ્યાતં લોકોપકૃતકારણાત્ ॥ ૧૯૧॥

સહસ્રનામમલ્લારેઃ કિમન્યચ્છ્રોતુમિચ્છસિ ।
ગુહ્યાદ્ગુહ્યં પરં પુણ્યં ન દેયં ભક્તિવર્જિતે ॥ ૧૯૨॥

ઇતિ શ્રીપદ્મપુરાણે શિવોપાખ્યાને મલ્લારિપ્રસ્તાવે શિવપાર્વતીસંવાદે
શિવપ્રોક્તં મલ્લારિસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।
શ્રીસામ્બસદાશિવાર્પણમસ્તુ ॥

॥ શુભંભવતુ ॥

મલ્હારી સહસ્ત્રનામસ્તોત્રમ્

The stotra is not found in the Padmapurana text.
The colophon is retained as was found in the handwritten manuscript.

*Shri Mallari Sahasranama Stotram 1000 names*
pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*